कर्षरपर्य्ये स्त्रियां ङीप् । २कल्पभेदे पु० । "तत्को द्रुविणोदाः ? इन्द्र इति क्रौष्टुकिः" निरुक्त० ८,२

**क्लथ** बधे वा चुरा० उभ०पक्षे भ्वा०प०सेट् घटादि० । क्लथयति ते क्लथति, अचिक्लथत् अक्लाथीत् अक्लथीत् । क्लथयांबभूव आस चकार चक्रे चक्लाथ । मध्ये घृतस्नापवर्त्तने च । "पौष्णो विष्यन्दमाने मारुतः क्लथन्" यजु० ३९,५, "क्लथनं मध्ये घृतस्नापवर्त्तनम्"वेददीपः

**क्लद** रोदने अक० आह्वाने सक० इदित् भ्वा० पर० सेट् । क्लन्दति अक्लन्दीत् । चक्लन्द । क्लन्द्यते

**क्लद** वैकल्ये दि० आत्म० अक०सेट् घटादि० । क्लद्यते अक्लदिष्ट चक्लदे । क्लदयति त अचिक्लदत् त ।

**क्लद** रोदने भ्वा० उभ० इदित् अक० सेट् । क्लन्दति ते अक्लन्दीत् अक्लन्दिष्ट । चक्लन्द चक्लन्दे । क्लन्द्यते "याः क्लन्दास्तमिषीचयो ऽक्षकामामनो मुहः तास्यो गन्धर्वपत्नीभ्योऽप्सराभ्योऽकरं नमः" अथ० २,२,५

**क्लप** अव्यक्तवाक्ये चुरा० उभ० अक० सेट् घटा० । क्लपयति-ते अचिक्लपत्—त । क्लपयां बभूव आस चकार चक्रे

**क्लम** ग्लानौ दिवा०पर०अक०सेट् शमा० । क्लाम्यति अक्लमीत् चक्लाम । उदित् क्लमित्वा—क्लान्त्वा । क्लान्तः । घञ् न वृद्धिः क्लमः । क्लम्यते अक्लमि । "क्लमं ययौ कन्दुकलीलयाऽपि या" "अक्लाय सा नियमजं क्लमसुत्ससर्ज" कुमा० "न चक्लाम न विव्यथे" भट्टिः "तपः क्लमं साधयितुं य इच्छति" शकु०

**क्लम** ग्लानौ भ्वा० पर० अक० सेट् । क्लमति इरित् अक्लमत् अक्लमीत् चक्लाम । क्लमित्वा । क्लमितः ।

**क्लम** पु० क्लम—भावे घञ् अवृद्धिः । "योऽनाय सः श्रमोदेहे प्रवृद्धः श्वाससङ्गतः । क्लमः स इति विज्ञेय इन्द्रियार्थ प्रबाधकः" । भावप्र० उक्ते श्रमभेदे ।

**क्लमथ** पु० क्लम-अथच् । आयासे अमरः ।

**क्लमिन्** त्रि० क्लम-घिनुण् अवृद्धिः । क्लान्तियुक्ते ।

**क्लव** भये दिवा० आत्म० अक० सेट् घटादि० । क्लव्यते अक्लविष्ट । चक्लवे । क्लवयति । वि-वैक्लव्ये विक्लवः ।

**क्लान्त** त्रि० क्लम-क्त । श्रमार्त्ते । [ यस्तदानीम्" माघः ।

**क्लान्ति** स्त्री क्लम-क्तिन् । परिश्रमे "क्लान्तिच्छिदोवनवनस्पत-

**क्लिद** आर्द्रीभावे दिवा० पर० अक० वेट् । क्लिद्यति । इरित् । अक्लिदत्-अक्लेदीत्-अक्लैत्सीत् । चिक्लेद । क्लेदः । क्लिद्यन् क्लेदी । क्लेदयति ते । अचिक्लिदत् त । "तेन क्लिद्यति व्रणः" सुश्रु० । "सुवेशं पुरुषं दृष्ट्वा भ्रातरं यदि वा सुतम् । योनिः क्लिद्यति नारीणाम्" हितो० । "लुठ्यन्ति भूमौ क्लिद्यन्ति बान्धवा मे स्वपन्ति च" भट्टिः । "कुन्त्याः प्रस्रवसंयुक्तैरस्त्रैः क्लिन्नसुरोऽभवत्" भा० आ०१३५ । "नचैनं क्लेदयन्त्यापो न शोषयति मारुतः । अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च" गीता । "रक्तैरचिक्लिदद्भूमिम् सैन्यैस्तानस्तरद्धतैः" भट्टिः । उपसर्गविशेषपूर्व्वकस्तु तत्तदुपसर्गद्योत्यार्थविशिष्टे क्लेदे ।

**क्लिद** रोदने इदित् भ्वा० उभ० अक० सेट् । क्लिन्दति ते अक्लिन्दीत् अक्लिन्दिष्ट । चिक्लिन्द चिक्लिन्दे । क्लिन्दितः । परिदेवने शोके सक०आत्म० । क्लिन्दते चैत्रम्"सि०कौ० ।

**क्लिन्न** त्रि० क्लिद-कर्त्तरि क्त । आर्द्रे (भिजे) क्लदधातौ उदा०

**क्लिन्नवर्त्मन्** न० "अरुजं बाह्यतः शूनमन्तःक्लिन्नं स्रवत्यपि । कण्डूनिस्तोदभूयिष्ठं क्लिन्नवर्त्म तदुच्यते" सुश्रुतोक्ते नेत्रावयवभेदवर्त्मगते रोगभेदे ।

**क्लिव** पु० क्लृप् क्विप् पृषो० । लोके । "ओं क्रतो ! स्मर क्लिवे स्मर कृतं स्मर" यजु० ४०,१५, "क्लिवे क्लृप्ताय लोकाय स्मर" माधवः । "कल्पते भोगाय क्लृप् लोकः तस्मै स्मर जशादेश आर्षः छन्दस्युभयथेति"पा०"पदान्तत्वात्"वेददी०

**क्लिश** उपतापे दिवा० आ० अक० उपतप्तीकरणे सक० सेट् पा० । क्लिश्यते अक्लेशिष्ट । क्लिशित्वा क्लिष्ट्वा । क्लिशितः क्लिष्टः । कविकल्पमते अयमुभयपदी तेन "क्लिश्यन्नपि हि मेधावी" प्रत्यासन्नतुषारदीधितिकरक्लिश्यत्तमोवल्लवीति" न्पात्मजौ चिक्लिशतुः ससीतौ" भट्टिः साधुः सकर्म्मकत्वे"इन्द्रियैः कामवृत्तैस्तु क्लिश्यसे प्राकृतोयथा" रामा० कि० १६,२७, अकर्म्मकत्वे "क्लिश्यते हि जनः सर्व्वः तरमाणः पुनः पुनः"भा० व० १३१अ० । "चिरं क्लिशित्वा मर्म्माविन्" भट्टिः परस्मैपदित्वे "वयः परार्थे क्लिश्यन्ति साक्षिणः प्रतिभूः कुलम्" मनुः । "क्लिष्टमक्लिष्टप्रभावानि ज्योतींषीव सुखानि वः" कुमा० । "क्लेशः फलेन हि पुनर्नवतां विधत्ते" कुमा० ।
उपसर्गपूर्व्वकस्तु तत्तदुपसर्गविशेषद्योत्यार्थोपतापे

**क्लिश** बाधने सक० क्र्या० ऊदित् वेट् । क्लिश्नाति अक्लेशीत् अक्लिक्षत् चिक्लेश । क्लिष्टः । क्लेशः । क्लिशित्वा क्लिष्ट्वा । क्लिशितः क्लिष्टः "इत्थमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम्" कुमा० । "अयं मां सुदृढं क्षुद्रः कौरवाणां यशोहरः । क्लिश्नाति नाहं तत् सोढुं चिरं शक्ष्यामि कौरव ।" भा०स० ६७ । "असुरस्तारकोनाम त्वया दत्तवरः प्रभो ! । सुरानुद्भीय क्लिश्नाति वधस्तस्य विधीयताम्" भा० आनु० ८५अ० ।